मंगलाष्टक-
शास्त्रोच्चार

॥ श्रीः ॥

विवाहसमयके

मंगलाष्टक-शाखोचार।

मुद्रक एवं प्रकाशकः

खेमराज श्रीकृष्णदास,

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग, बम्बई-४०० ००४

संस्करण : जनवरी २०१४, संवत् २०७०

मूल्य : १० रुपये मात्र

श्रीगणेशाय नमः ।

मंगलाष्टकानि ।

अविरलमदधाराधौतकुम्भः शरण्यः फणिवर-
वृतगात्रः सिद्धसाध्यादिवन्द्यः । त्रिभुवनजनविघ्न-
ध्वान्तविध्वंसदक्षो वितरतु गजवक्त्रःसन्ततं मङ्गलं
वः ॥ १ ॥ विघ्नाशनो विघ्नविदूरकारी निर्विघ्नकार्यं
सकलार्थसिद्धिः । विघ्नेश्वरो विघ्ननरेशपूज्योवधूव-
राभ्यां हि शुभं ददातु ॥२॥ सकलभुवनवृन्दान-
न्दसन्दोहकन्दः प्रतिदिनममृतौघप्रीणितः स्वर्गि-
वृन्दैः।परमपुरुषचित्तादुद्गतो रोहिणीशः कुमुदकु-
लविकासी मङ्गलं वो ददातु ॥ ३ ॥ दलितदनु-
जवृन्दं यस्य मन्त्रप्रभावात् सुरपतिरतिभुंक्ते
निर्भयो नाकराज्यम् । शमितसकलदोषं यस्य
दृष्टचा हि लग्नं स सुरगुरुरजस्रं मङ्गलं वो ददातु
॥ ४ ॥ यन्मङ्गलं प्रवरशङ्खगदाधरस्य रामस्य
रावणजयाय समुद्यतस्य । जित्वा निशाचरपुरीं

पुनरागतस्य तन्मङ्गलं भवतु वो विजयाय नित्यम् ॥५॥ यन्मङ्गलं त्रिदशमौलिकिरीटरत्नचन्द्रप्रभापटलधौतपदाम्बुजस्य । गौरीविवाहसमये शशिशेखरस्य तन्मङ्गलं भवतु वो विजयाय नित्यम् ॥ ६ ॥ सकलभुवनचक्षुर्ध्वान्तविध्वंसदीपस्त्रिदशपतिदिशो यः स्वर्णताटङ्कपत्रम् । सकलभुवनलक्ष्मीदायको नायकोऽह्नां विबुधनिखिलमूर्तिर्मङ्गलं वो ददातु ॥ ७ ॥ यन्मङ्गलं महेन्द्रस्य प्राप्ते देवसमागमे । ऋषिभिः स्तूयमानस्य तत्ते भवतु मङ्गलम् ॥ ८ ॥ इति ॥

अथ नवग्रहमङ्गलाष्टकम् ।

भास्वान् काश्यपगोत्रजोऽरुणरुचिः सिंहाधिपोऽर्कः समित्षट्त्रिस्थो दशमःशुभो गुरुशशिक्षोणीजमित्रः सदा । शुक्रार्कौ तु रिपू कलिङ्गविषयेशोऽग्नीश्वरौ दैवते मध्ये वर्तुलपूर्वदिङ्मुख इनः कुर्यात्सदा मङ्गलम् ॥ १ ॥ चन्द्रः कर्कटराशिपः सितरुचिः स्वच्छोऽत्रिगोत्रोद्भवो बह्वासारतुषार-

शीतकिरणस्त्वापः शिवो दैवतम् । षट्सप्ताग्नि-
दशाद्यगः शुभफलो नोऽरिर्बुधार्कप्रियः स्याता-
यामुनदेशपर्णसमिधो कुर्यात्सदा मङ्गलम् ॥२॥
भौमो याम्यमुखस्त्रिकोणयमदिग्विध्येश्वरः खादि-
रस्त्वधमो वृश्चिकमेषपोऽस्य सुहृदः सूर्येन्दुजीवाः
स्मृताः । ज्ञोऽरिः षट्त्रिखगःशुभोऽथ वसुधास्कन्दौ
क्ष्मादैवते भारद्वाजकुलोद्भवः क्षितिसुतः कुर्यां०
॥३॥ सौम्यः पीत उदङ्मुखःसमिदपामार्गोऽत्रिगो-
त्रोद्भवो बाणेशानदिशो हितो रविसितौ शत्रुः
स्मृतः शीतगुः । कन्यायुग्मपतिर्दशाष्टगचतुःषण्ने-
त्रगः शोभनो देवो विष्णुसुपूरुषो मगधपः कुर्या-
त्स० ॥४॥ जीवस्त्वाङ्गिरसः कुबेरवदनो दीर्घोत्त-
राशास्थितः पीताश्वत्थसमिच्च सिंधुविषयःशक्रो
विधिर्दैवते । सूर्येन्दुक्षितिजाः प्रियो बुधसितौ शत्रू
धनुर्मीनपः सप्ताङ्कद्विसुते हितः सुरगुरुः कुर्यां०
॥ ५ ॥ शुक्रो भार्गवगोत्रजः सितनिभः पूर्वामुखः
पञ्चकोणेन्द्रस्थो घटगोपतिःखलुमहाराष्ट्रेश औदु-

श्वरी। इन्द्राणीमघवासुरौ बुधशनी मित्रे रवीन्दू अरी षट्सप्ताभ्रकुवार्जितो भृगुसुतः कुर्यात्सदामङ्गलम् ॥६॥ मन्दः पाशिमुखः शमी समिदयःसौराष्ट्रपः काश्यपः कुम्भो नक्रपतिर्हितौ बुधसितौ सूर्येन्दुभौमाः पराः। स्थानं पश्चिमदिक्प्रजापतियमौ देवौ धनुष्यासनः षट्त्रिस्थः शुभकृच्छनी रविसुतः कुर्यात्सदा मङ्गलम् ॥७॥ राहुर्बर्बरदेशपस्तिमिरभो नैर्ऋत्यशूर्पासनो यः पैठीनसगोत्रजः खलु समिद्दूर्वामुखं दक्षिणे।कालः प्रत्यधिदेवतास्त्वधिसुरः सर्पः खचन्द्रस्थितः षट्त्रिस्थः शुभदोऽर्धकाय उदितः कुर्यात्सदा मङ्गलम् ॥८॥ केतुर्जैमिनिगोत्रजः कुशसमिद्वायव्यकोणे स्थितश्चित्राङ्कध्वजलाञ्छनो हि भगवान्यो दक्षिणाशामुखः। ब्रह्माधिस्त्रिदशालयः सुरपतिः सच्चित्रगुप्तः खगः षट्त्रिस्थश्चशुभः पलाशसदृशः कुर्यात्सदा मङ्गलम् ॥ ९ ॥ इत्येवं ग्रहमंगलाष्टकमिदं लोकोपकारप्रदं पापौघप्रशमं महत्सुखकरं सौभाग्यसं-

वर्धनम् । यः प्रातः शृणुयात्पठेदनुदिनं श्रीकालिदासोदितं स्तोत्रं मंगलदायकं सुपठनं प्राप्नोत्यभीष्टं महत्॥ १०॥ इति श्रीनवग्रहमंगलाष्टकं समाप्तम् ॥

अथ वाणीराजोदितं मङ्गलाष्टकम् ।

लक्ष्मीर्यस्य परिग्रहःकमलभूः सूनुर्गरुत्मांस्तथा पत्रं चंद्रविभीषणौ सुरगुरुः शेषस्तु शय्यासनम् । ब्रह्माण्डं वरमन्दिरं सुरगणा यस्य प्रभोः सेवकाःस त्रैलोक्यकुटुम्बपालनपरः कुर्यात्सदा मंगलम् ॥ १॥ ब्रह्मा वायुगिरीशशेषगरुडा देवेन्द्रकामौ गुरुश्चन्द्रार्कौ वरुणानिलौ मनुयमौ वित्तेशविद्येश्वरौ । नासत्यौ निर्ऋतिर्मरुद्गणयुताः पर्जन्यमित्रादयः सर्वे ते सुरपुङ्गवाः प्रतिदिनं कुर्युःसदा मंगलम्॥२॥ मान्धाता नहुषोऽम्बरीषसगरौ राजा पृथुर्हैहयः श्रीमान् धर्मसुतो नलो दशरथो रामो ययातिर्यदुः । इक्ष्वाकुश्च विभीषणश्च भरतश्चोत्तानपादो ध्रुवो ह्यीत्याद्या भुवि पार्थिवाः प्रतिदिनं कुर्युः सदा मंग-

लम् ॥ ३॥ श्रीमेरुर्हिमवांश्च मन्दरगिरिः कैलास-
शैलस्तथा माहेन्द्रो मलयादिविन्ध्यनिषधाः सिंह-
स्तथा रैवतः। सह्याद्रिर्वरगन्धमादनगिरिर्मैनाक-
गोमान्तगावित्याद्या भुवि भूभृतः प्रतिदिनं कुर्युः
सदा मंगलम्॥४॥ विश्वामित्रपराशरौ च भृगवो-
ऽगस्त्यः पुलस्त्यः क्रतुः श्रीमानत्रिमरीचिकौत्स-
पुलहाः शक्तिर्वसिष्ठोऽङ्गिराः।माण्डव्यो जमदग्नि-
गौतमभरद्वाजादयस्तापसाः श्रीविष्णोर्गुणराशि-
कीर्तनपराः कुर्युः सदा मंगलम् ॥ ५ ॥ गंगासिंधु-
सरस्वती च यमुना गोदावरी नर्मदा कृष्णा भीम-
रथी च फल्गुसरयूः श्रीगण्डकी गोमती। कावेरी-
कपिला प्रयागवनिता वेत्रावतीत्यादयोनद्यःश्रीह-
रिपादपंकजभवाःकुर्युः सदा मंगलम्॥६॥वेदाश्चो-
पनिषद्गणाश्च विविधाःसांगाः पुराणान्विता वेदांता
अपि मन्त्रतन्त्रसहितास्तर्काः स्मृतीनां गणाः।
काव्यालंकृतिनीतिनाटकगणाः शब्दाश्च नानावि-
धाःश्रीविष्णोर्गुणराशिकीर्तनपराः कुर्युः सदा मंग-

लम् ॥७॥ आदित्यादिनवग्रहाः शुभकरा मेषादयो राशयो नक्षत्राणि सयोगकाःसतिथयस्तद्दैवतास्तद्गणाः ॥ मासाब्दा ऋतवस्तथैव दिवसाः सन्ध्यास्तथा रात्रयः सर्वे स्थावरजंगमाः प्रतिदिनं कुर्युः सदा मंगलम् ॥ ८ ॥ इत्येतद्वरमंगलाष्टकमिदं श्रीवाणिराजोदितं व्याख्यानं पठतामभीष्टफलदं सर्वाशुभध्वंसनम् ॥ मांगल्यादिशुभक्रियासु सततं सन्ध्यासु प्रातः पठेत्सर्वार्थान्समुपागतान्प्रतिदिनं कुर्यात्सदा मंगलम् ॥९॥ इति वाणि॰ मंग॰ ॥

अथ नृसिंहाचार्यकृतं मंगलाष्टकम् ।

श्रीनाथाङ्घ्रिसरोजयुग्ममलं लोकत्रये पावनं गंगाजन्मनिकेतनं सुरतरुं भक्तप्रसादास्पदम् ॥ नत्वा मंगलपाठसिद्धिविविधे मौहूर्तिकानां सदा सम्यक्सौम्यमुहूर्तदानसमये वक्ष्ये सुलग्नाष्टकम् ॥१॥ ब्रह्मा विष्णुमहेश्वरौ गणपतिः संक्रन्दनोऽग्निर्यमो रक्षः पाशिमरुत्कुबेरपशुपाः सर्वे सुराः

पन्नगाः ॥ भानुश्चन्द्रकुजज्ञजीवभृगुजाः कृष्णो-
रगाःकेतवश्चैते पान्तु सदा सुलग्नसुमुखाःकुर्वन्तु
वो मङ्गलम्॥ २ ॥ शक्तिः शङ्खमथाङ्कुशध्वजसि
तच्छत्रप्रदीपप्रभाश्चाष्टौ चामरतोयकुम्भसहिताः
सन्मङ्गलाः सर्वदा ॥ सत्पीताक्षतजीरसैन्धव-
निशाः पूगीफलं वै गुडश्चैते पान्तु सदा सुलग्न-
सुमुखाः कुर्वन्तु वो० ॥ ३ ॥ घण्टानादमृदङ्गदु-
न्दुभिरवैर्ढक्काणशब्दा जयोनानामङ्गलगीतनृत्य-
निवहैर्निक्काणवेणुध्वनिः ॥ विप्राशीर्वचनानि वेद-
निनदः संपूर्णशास्त्राध्ययश्चैते पान्तु सदा सुलग्न-
सुमुखाः कुर्वं० ॥ ४ ॥ दूर्वाग्रं मधुपञ्चगव्यसहितं
गोरोचनं श्रीफलं कर्पूरादिसुगन्धवस्त्रनिचयाः
श्रीचन्दनानीति च ॥ ताम्बूलं फलपुष्पपूर्णकलशाः
पण्याङ्गनाभिर्वृताश्चैते पान्तु सदा सुलग्नसुमुखाः
कुर्वन्तु वो० ॥ ५ ॥ मन्वादिस्मृतयः पुराणततयः
काव्यप्रबन्धादयः षट्कक्षाः श्रुतयश्च तन्त्रविधयः
सूत्राणि भाष्याणि च ॥ सिद्धान्तागमधर्मजात-

कदृशो गर्गादिकाः संहिताश्चैते पान्तुसदा सुलग्नसु-
मुखाः कुर्वन्तु वो० ॥ ६ ॥ दिङ्नागागिरयस्त्वन-
र्घ्यमणयस्त्रेधाविभक्तास्त्रयःक्ष्मापाला मुनयः प्रस-
न्नकवयः सम्पूर्णशास्त्राब्धयः । संकल्पद्रुमकामधे-
नुसहिताश्चिन्तामणिः कौस्तुभश्चैते पान्तु सदा
सुलग्नसुमुखाः कु० ॥ ७ ॥ श्रीवत्सान्वयनारसिंह-
रचितं शार्दूलविक्रीडितैः सेव्यं शत्रुहरं समृद्धितकरं
वृत्तानुरूपस्थितम् ॥ पाथोधिः सततं परं सुखतरं
धर्मार्थकामप्रदं सर्वेषां तु सदा सुलग्नसुमुखाः
कुर्वन्तु वो मंगलम् ॥ ८ ॥ इति ।

अथ कालिदासोक्तं मङ्गलाष्टकम् ।

श्रीमत्पंकजविष्टरौ हरिहरौ वायुर्महेन्द्रोऽनिल-
श्चन्द्रो भास्करवित्तपालवरुणप्रेताधिपा वै ग्रहाः ॥
प्रद्युम्नो नलकूबरः सुरगजश्चिन्तामणिः कौस्तुभः
स्कंदः शक्तिधरश्च लाङ्गलधरःकुंवन्तु वोम० ॥१॥
गौरी श्रीरदितिश्च कद्रुसुभगा सूतिः सुपर्णा शुभा

सावित्री तु सरस्वती वसुमती सत्यव्रतारुन्धती ॥
स्वाहा जाम्बवती च रुक्मभगिनी दुःस्वप्नविध्वं-
सिनी वेला चाम्बुनिधेः समीनमकराः कुर्वन्तु वो०
॥२॥ नेत्राणां त्रितयं शिवःपशुपतिर्वह्नित्रयं पावनं
यद्वद्विष्णुपदत्रयं त्रिभुवने ख्यातं च रामत्रयम् ॥
गंगावाहपथत्रयं सुविमलं वेदत्रयंत्रिस्वरं सन्ध्यानां
त्रितयं द्विजैरभिहितं कुर्वं० ॥३॥ अश्वत्थो वटवृक्ष-
चन्दनतरू मन्दारकल्पद्रुमौ जम्बूनिम्बकदम्बचूत
सरला वृक्षाश्च ये क्षीरिणः ॥सर्वे ते फलमिश्रिताः
प्रतिदिनं विभ्राजिताः सर्वतो रम्यं चैत्ररथं सनंद-
नवनं कुर्वन्तु० ॥४॥ वाल्मीकिः सनकः सनन्दन-
मुनिर्व्यासो वसिष्ठो भृगुर्जाबालिर्जमदग्निरत्रिजन-
कौगर्गोऽङ्गिरा गौतमः ॥ मान्धाता ऋतुपर्णवेन-
सगरा धन्यो दिलीपोनलः पुण्योधर्मसुतोययाति-
नहुषौ कुर्वन्तु० ॥५॥ ब्रह्मा वेदपतिः शिवः पशु-
पतिः सूर्यश्च चक्षुष्पतिः शक्रो देवपतिर्यमः पितृ-
पतिः स्कन्दश्च सेनापतिः ॥ यक्षो वित्तपतिर्हरिश्च

जगतां वायुःपतिःप्राणिनामन्ये ये पतयो वसन्ति सततं कुर्वन्तु० ॥६॥गंगासिन्धुसरस्वती चयमुना गोदावरी नर्मदा कावेरी सरयू महेंद्रतनया चर्मण्वती वेदिका॥क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गण्डकी पुण्याः पूर्णजला समुद्रसहिताः कुर्व०॥७॥ गंगा गोपतिगोमती गणपतिर्गोविंदगोवर्द्धनौगीतागोमयगोरजो गिरसुतागङ्गाधरोगौतमः।गायत्री गरुडो गया गिरिपतिर्गम्भीरगोदावरी गन्धर्वो गृहगोपगोकुलगणाः कुर्व० ॥८॥ लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमा गावः कामदुघाः सुरेश्वरगजो रम्भादिदेवाङ्गनाः॥ अश्वः सप्तमुखो विषं हरिधनुःशङ्खोऽमृतं चाम्बुधे रत्नानीति चतुर्दश प्रतिदिनं कुर्व० ॥९॥ इत्येवं वरमंगलाष्टकमिदं पापौघविध्वंसनं पुण्यं संप्रतिकालिदासकविना वृत्तप्रबन्धीकृतम् ॥ यः प्रातः शृणुयात्समाहितमना नित्यं पठेद्भक्तिमान् गंगासागरसंगमे प्रतिदिनं स्नानस्य पुण्यं लभेत् ॥ १० ॥

यद्वल्लक्ष्मीर्मधुमथनयोः पत्रिणोश्चक्रनाम्नोर्यद्वन्नि
त्यं कुमुदशशिनोः पद्मिनीसूर्ययोश्च ॥ गाढप्रेम्णो-
र्गिरिशशिवयोः सुप्रसिद्धिश्च यद्वज्जायापत्योर्भवतु
भवतोस्तद्वदेव त्रिलोके ॥ १ ॥ अत्रिकश्यपवसि-
ष्ठगौतमा व्यासगालवपुलस्त्यकौशिकाः । गाधि-
शौनकमरीचिनारदा मंगलं ददतु तेऽभिषेकजम्
॥ २ ॥ सूर्यसोमकुजचन्द्रनन्दना जीवशुक्रशनि-
राहुकेतवः । विष्णुकुम्भसुतशंकरादयो मंगलं
ददतु तेऽभिषेकजम् ॥ ३ ॥ ब्रह्मा वेदपतिः शिवः
पशुपतिः शक्रःसुराणां पतिर्विष्णुर्यज्ञपतिर्हविर्हुत-
पतिर्धर्मः पितॄणां पतिः। प्राणो देहपतिः सदागति
रयं ज्योतिष्पतिश्चंद्रमाः सर्वे ते पतयः कुबेरस-
हिताः कुर्वन्तु ते मंगलम् ॥ ४ ॥ मत्स्यःकूर्मतनुर्व-
राहनृहरिःश्रीवामनो भार्गवस्तद्रद्दाशरथिश्च याद-
वपतिर्बुद्धोऽथ कल्कीपतिः। अन्ये चापि सनत्कु-
मारकपिलप्रख्याः कलांशा हरेः सर्वे ते कलिक-
ल्मषघ्न चरिताःकुर्वन्तु नो मंगलम्॥५॥आदित्यो-

ऽग्नियुतःशशी सवरुणो भौमःकुमारान्वितःसौम्यो
विष्णुयुतो गुरुः समघवा देव्या युतो भार्गवः । स-
ब्रह्मा रविजो गणेश्वरयुतो राहुर्भुजङ्गेश्वरो मांगल्यं-
सततं हरार्चनरताः कुर्वन्तु सर्वे ग्रहाः ॥६॥ आयु-
र्द्रोणसुते श्रियो दशरथे शत्रुक्षयो राघवे ऐश्वर्यं
नहुषे गतिश्चपवने मानं च दुर्योधने । शौर्यं शांत
नवे बलं हलधरे सत्यं च कुन्तीसुते विज्ञानं विदुरे
भवंतु भवतः कीर्तिश्च नारायणे ॥७॥ आयुष्मान्
बहुपुत्रवान् भव चिरं श्रीमान्यशस्वी भव प्रज्ञा-
वान् भवभूरिभूतिकरुणैर्व्यापारदक्षो भव । तेजस्वी
भव वैरिदर्पदलने दानैकनिष्ठो भव श्रीशम्भोर्भव
पादपूजनरतः सर्वोपकारी भव ॥ ८ ॥ आयुर्बलं
विपुलमस्तु सुखित्वमस्तु सौभाग्यमस्तु विशदा
तवकीर्तिरस्तु । श्रेयोऽस्तु धर्ममतिरस्तु रिपुक्षयो-
ऽस्तु सन्तानवृद्धिरभिवांछितसिद्धिरस्तु ॥ ९ ॥
दीर्घायुर्भव जीव वत्सरशतं नश्यन्तु सर्वापदःस्वा-
स्थ्यं संभज मुञ्चचञ्चलधियं लक्ष्म्येकनाथो भव।

किं ब्रूमो भृगुगौतमात्रिकपिलव्यासादिभिर्भाषितं यद्रामस्य पदाभिषेकसमये तच्चास्तु ते मंगलम् ॥१०॥ यावदिन्द्रादयो देवा यावच्चन्द्रदिवाकरौ। यावद्धर्मक्रिया लोके तावद्भूयात्स्थितिस्तव ॥११॥

इति मङ्गलाष्टकानि।

अथ शाखोच्चार।

गणपति गौरीपुत्रको, सुमरूँ बारंबार ॥ देवी विष्णू शम्भुको, सुमरूँ जगकर्त्तार ॥१॥ पांचदेवको ध्यायके, शाखाकहूँ बनाय। राधाकृष्णके ब्याहकी, सुनियो चित्त लगाय ॥ २ ॥ जो सुनके सुख होयगो, सबहीके मनमाहिं ॥ दुःख मिटै संकट कटैं, सकल पाप मिटि जाहिं ॥३॥ एक समय वृषभानुजा, मनमें बहुत विचारि ॥ वर ढूँढन नापित कही, ढूँढ़े कृष्ण मुरारि ॥ ४ ॥ समय देखके ब्याहको, शुभ दिन बार विचार ॥ लग्न लिखायो शुभ घडी, कीन्हो मंगलचार ॥ ५ ॥ लग्न लेय नापित चल्यो, घर दीन्हो वसुदेव ॥ झोरी डारयो

कृष्णकी, सबही कीन्हो नेव ॥ ६ ॥ ब्याह
दिवस आयो जभी, सजकर चली बरात ॥ हस्ती
घोडे रथ सजे, मारग नहीं समात ॥ ७ ॥
नर नारी देखैं सभी, मनमें हर्ष उठाय ॥ सो छबि
कृष्णबरातकी, हमसे कही न जाय ॥ ८ ॥ गिरि-
धारी चौंरी चढे, पण्डितलिये बुलाय ॥ बहुत
भांति बेदी रची, मन्त्र पढैं चित लाय ॥ ९ ॥
दुलहन रानी राधिका, वर भये नन्दकुमार ॥ नारी
देवैं सीठने, होरहे मंगलचार ॥ १० ॥ नारि कहै
इक कृष्णसे, अति अचरजकी बात ॥ कैसे बारी
उमरमें, गिरी उठायो हाथ ॥ ११ ॥ छन्द कहावें
कामिनी, वारि वारि दें दान ॥ कृष्ण छन्द मुख-
से कह, नारि करें सनमान ॥१२॥ श्रीराधा परि-
णायके, बिनय करी वृषभान ॥ नन्दराय तुम
हो बडे, मोहिं दास कर मान ॥१३॥ ऐसे बिनती
करि घनी, दीन्हे दान अघाय ॥ हस्ती घोडे रथ
सभी, दीन्हे बहुत सजाय ॥१४॥ बहुत दास दासी

दिये, गहने वस्त्र सजाय ॥ बिरखभानके दानकी, गिनती कही न जाय॥१५॥होय बिदा घरको चले बडे खुशी नँदराय॥सब सुंदर बाजे बजे,ध्वजा फरकती जाय ॥१६॥शाखा कृष्णके ब्याहकी, सुने जु चित्त लगाय॥दुब्ध्या मनकी दीसरै,सकल काम होजाय॥१७॥एतिक मेरी उक्ति है,शाखा कही बनाय।चिरंजीव रह वरवधू, सुनो गोत्र चित लाय १८

इति शाखोच्चार समाप्त।

अथ पत्तल बखान ।

उमा पुत्रको सुमरता, जानो नाम गणेश ।
जिनकूँ सुमिरे देवता, सबके काटे क्लेश ॥ १ ॥
सुमरूं देवी अम्बिका, जिसके नाम अनंत ।
सुमरूं ब्रह्मा विष्णु शिव, जिनकूं सुमरे सन्त ॥२॥
पांच देवकूं ध्यायके, पत्तल करूं बखान ॥ नरनारी सबही सुनो, करके सभी जु कान ॥ ३ ॥
बसतिराम पत्तल कहै, सुमिरि सरस्वति नाम ॥
नर नारी सुन लीजियो, रहता बेरी गाम ॥ ४ ॥

इस पत्तलके बीचमें, अति सुंदर हैं बैन॥ प्रीती करके सब सुनो, सुनकर हो सुख चैन ॥ ५॥ उन्तालीस विशेष जो, उन्नीस्सौ शुभसाल॥ ता संवतके बीचमें, पत्तल बनी विशाल॥६॥ आदरसे परसें सभी, भोजन नीके माल ॥ नारी रल-मिल बांधियां,पत्तल अभी जु हाल॥ ७॥ अब पत्तल हम खोलते, सुनो सुंदरी बैन॥ छूटें रसोई ये सभी, बँधें तुम्हारे नैन॥ ८॥ छूटें बाह्मन पुरुष सब, भोजन छुटे अनूप॥ बांधूं चञ्चल नारिको, सबके बांधूं रूप ॥ ९॥ छूटें लाडु जलेबियां, और सभी पकवान॥ बांधूं वेणी शीशपर, आभूषण कर कान ॥ १०॥ छूटे पेडे बरफियां खुरमां छूट सुहाल ॥ बांधूं कंकण चूडला, बांधूं सबकी चाल॥ ११॥ छूटी फेनी घीवकी, जीमत उपजे चैन॥ बांधूं नख मुख केश सब,कज्जल भरे जु नैन॥१२॥ छूटे सीरा लापसी, मोहनभोग रु भात॥ बांधू शोभित मांग शिर,

शोभा शोभित गात ॥ १३ ॥ छूटी पूरि कचो-रियां, साग अनेक प्रकार ॥ बांधू पायल बाजणी, बिछुवनकी झनकार॥१४॥छूटी लौंग इलायची, पूगीफल अरु पान ॥ बांधू नारी बोलती, सब जीमो पकवान ॥ १५ ॥ पत्तल सबकी छुट गई, बँधे नारिके गात॥वसतिराम अब यों कहे, जीमो सभी बरात ॥ १६ ॥ नारी सगरी बांधके, पत्तल दई छुटाय॥वृद्ध तरुण बालक सभी, जीमो हरष उठाय ॥ १७ ॥ इति श्रीबेरीनिवासी पंडितवस-तिरामविरचित पत्तल समाप्त ।

अथ शाखोच्चार बखान ।

दोहा-प्रथमै सुमरूं शारदा, ध्याऊं देवगणेश॥कोटि विघ्न टालै सदा,सुखदायक जु महेश ॥१॥ राम-चन्द्रके ब्याहको, वरणूं शाखोच्चार ॥ नामलेत रघुनाथको, उधैरं सब नर नार ॥ २ ॥ एक समै दशरथ गृहे, विश्वामित्र मुनीश ॥ रामलषण सँग

लेनकूं, आये बिश्वाबीस॥३॥शीश नाय कर जो-
रिकै, बोले दशरथराय ॥ जो तू मांगे ब्रह्मऋषि,
सो देऊं चितलाय॥४॥तबहीं विश्वामित्रजी,वचन
राजके लीन्ह। दशरथसुत सँग लेय कर,यज्ञसंपू-
रण कीन्ह॥५॥दिन व्यतीत बहुतै भये, सँगलीन्हे
रघुनाथ। बहुरि गये मिथिलापुरी, दोऊ भाई
साथ ॥ ६ ॥ मिथिलापुरकूं देखिके चकित भये
रघुवीर ॥ ऐसी अवधपुरी जहां, जड़े स्वर्ण अरु हीर
॥ ७ ॥जाय वास महलों कियो, कहें जु सब नर
नारि। वरलायकश्रीरामजी,सीताके अनुसारि॥८॥
रच्यो स्वयम्वर जनकजी,कठिन धनुषपण घाल॥
तोडत हैं सब भूप मिलि, कछु मुसके नहिं हाल
॥९॥ जब बोले हैं जनकजी,क्षत्री अंश न कोय।
वचन सुनतही जनकको,कोपे लक्ष्मण छोय॥१०॥
कहै लषणकूं रामजी, मनमें राखो धीर। कठिन
धनुषकूं लेयके, तब तोड्यो रघुवीर ॥ ११ ॥
धनुष तोड कुटका किया, वरमाला तब लीन्ह।

असुरनको श्रीरामजी, सर्वतेज हत कीन्ह ॥ १२ ॥
जनक राज हरष्यो घणो, लीन्हे दूत बुलाय ॥
जबही भेजे अवधपुर, तबही पहुँचे जाय
॥ १३ ॥ दे दशरथकूं पत्रिका, बोले शीश
नवाय ॥ रामचन्द्रके व्याहकी, आज्यो जान
बनाय ॥ १४ ॥ आनन्दहि भयो नगरमें, घर घर
मंगलचार ॥ दूतोंकूं राजी किया, दे दे महोर जु
हार ॥१५॥ अवधपुरी सब संग ले, बाजा बहुत
बजाय ॥ राजा भरत अरु शत्रुघन, चढे गणेश
मनाय ॥१६॥ जब पहुँचे मिथिलापुरी, ढोलमृदंग
घुराय ॥ देखन आयो नगर सब, देखैं मन हर्षाय
॥१७ दुनियां आपसमें कहै, देखो नैन लगाय ॥
जैसे लक्ष्मण राम हैं, तैसे ये दोउ भाय ॥१८॥
जब आये श्रीरामजी, पिता दास सन्मुक्ख ॥
चारों भाई मिलतहैं, हिरदै उमग्यो सुक्ख ॥१९॥
जामो पहरचो नौलखौ, रामचन्द्रजगमाहिं ॥ ऐसी
छबि श्रीरामकी, तीन लोकमें नाहिं ॥२०॥ रत्न

जड़ित शिर सेहरो, कुण्डल कानोंमाहिं ॥ शीश मुकुट अरु छत्र है, शोभा कही न जाहिं ॥२१॥ करत गान गंधर्व सब, देववधू सब साथ ॥ तब ढूके श्रीरामजी, तीन लोकके नाथ ॥ २२ ॥ सब मिलि सखी सहेलियां, मंगल बात विचार ॥ कुंकुम तिलक चढ़ायके, करैं आरती नार ॥२३॥ चौक पुरायो मोतियां, रत्नजडाऊ थम्भ ॥ मोतियनके अक्षत दिये, शुभदायक घर कुम्भ ॥२४॥ कंचन चौकी बैठियां, सीताराम समान ॥ शतानंद पूजा करै, विधिसों वेद बखान ॥ २५ ॥ विश्वामित्र वसिष्ठजी, होमकरै शुभकार ॥ शुभ नारी दे हीठणां, गावैं मंगलचार ॥ २६ ॥ हथलेवो जोडयो जबै, कीन्हों मुक्तो दान ॥ ब्राह्मण जनकूं देयकै, बहुत कियो सनमान ॥ २७ ॥ फेरा लें श्रीरामजी, बाजै मंगल भेर ॥ रणसींगा अरु दुन्दुभी, गजैं जिमि घनघोर ॥ २८ ॥ जनकसुता सीता भई, अवधपुरी रघुनाथ ॥

मिथिलापुरमें व्याहिया, चारो भाई साथ ॥२९॥
हथलेवो छूटयो जबै, रथ दीन्हा सिणगार ॥
कोटिक दीन्हीं दासियां,सीताजीकी लार ॥३०॥
सर्वरीति कुलकी करी, सो सब कही न जाय ॥
द्विज बंदी जन सर्वही, भये अचानक आय
॥ ३१ ॥ करैं बीनती जनकजी, दशरथ आगे
आय ॥ हमसेती कछु टहलगी, बनी नहीं मह-
राज ॥३२॥ तब बोले दशरथ तहां, धन्य धन्य
महराज ॥ मनवांछित सबही लिये,पास तुम्हारे
आज ॥ ३३ ॥ पुरी अयोध्या आइयां, घर घर
मंगलचार ॥ बंदीजन सब देखि‍कै जै जै करैं
उचार ॥ ३४ ॥ शिव सनकादिक सर्वही, शेष न
पावैं पार ॥ मति अनुसार कही हमैं,सियारामकी
भार ॥ ३५ ॥ नग्र फतेपुरके बिषे, वरणूं शाखो-
च्चार ॥ मार्गशीर्ष शुक्लाष्टमी,पुनि रविसुत है वार
॥३६॥एतिक मेरी उक्ति है,शाखा कही बनाय॥ब्रज-
नँद सुतकी बीनती, सुन लीज्यो रघुराय ॥३७॥

इति श्रीलयगोविन्दकृत शाखोच्चार समाप्त।

गजमुख प्रथम मनायकै, गुरुपदपंकज ध्याय॥
सकल सभा चित दे सुनो, भाषा रची बनाय ॥
॥ १ ॥ रामचन्द्र सीतापती, राधा नन्दकुँवार ॥
सावित्री ब्रह्मापती, रचो सकल संसार ॥ २ ॥
कौशल्या दशरथपती, इन्द्राणी इन्द्राज ॥ ईश्वर
परणी गौरज्या, दमयन्ती नलराज ॥ ३ ॥ वसिष्ठ
व्याहि अरुन्धती, अर्जुन द्रौपदी साथ ॥ चन्द्र
भार्या रोहिणी, ऋद्धि सिद्धि गणनाथ ॥ ४ ॥ शंभू
पारवतीपति, लक्ष्मीपति भगवान ॥ जिन ध्याये
आनँद घणा; सुमरो सबइ सुजान ॥ ५ ॥ नांवजी
इतना पत्नीको, सुंदर पुरुष सुजान ॥ सुंदर देखत
सकल मिल, अपने अपने स्थान ॥ ६ ॥ गावत
मंगलचार मिल, ध्यावत श्रीगोपाल ॥ जिन
ध्याये सुख पाइये, वर कन्या रिछपाल ॥ ७ ॥
पीछे वरणूं व्याहको, रुकमण भये अनंद ॥
आये कृष्ण बरात ले, बाजै भेरि मृदंग ॥ ८ ॥
घुरत नगारा ढोल सब, मधुर गीत औचंग ॥ रंग

ढोल अतिशब्दसे, बजे शंखउपशंख ॥ ९ ॥ गजमाथे श्रीरजतकी, नोशत अंबर झूल ॥ अंबाड़ी मोतियन जड़ीं, रही फूलसी फूल ॥१०॥ तापै दुलहौ अति सुघड, पहने उज्ज्वल चीर ॥ शीशमुकुट हीरे जडे, भले बने यदुवीर॥११॥ सज्जनकेद्वारे खडे, मो'..., यन चौक पुराय ॥ कियो आरती शुभ घडी, तोरण लियो छुवाय ॥ १२ ॥ सिंहासन बैठे साँवरे, राधा नंदकँवार ॥ भानु ऊगतो शरद चँद, सोला कला सँवार ॥१३॥ गणपतिकी पूजा करी, ब्रह्मावेद पढन्त ॥ कीन्ही आज्ञा द्विजनकूं, ज्ञानवंत धनवंत ॥१४॥ तिलक जो कियो ललाट पर, अक्षत धरे बनाय ॥ दई दक्षिणा द्विजनकूं, लई सबी मन भाय ॥१५॥ दे अशीष ब्राह्मण चले, सुखी रहो यजमान॥इहि विधि कन्यादान दे, भोत कियो सन-मान ॥१६॥ करी कृपा हरनाथजी, जादू रची बनाय ॥ या जोड़ी अविचल सदा, दुलहिन दूलो-राय ॥ १७ ॥ एतिक मेरी उक्ति है, शाखा कही

बनाय ॥ ब्रजनँदसुतकी बीनती, सुनि लीज्यो महराय ॥ १८ ॥ इति शाखोच्चार समाप्त ॥ ४ ॥

जय गोविन्दकृत पत्तल ।

छप्पय–सुमरूं गनपति देव प्रीतिकर शारद ध्याऊं ॥ सदा करो कल्याण, सभाबिच मंगल गाऊं ॥ १ ॥ कृष्णचरण चित लाय, हिये बिच उमँग उठाउँ ॥ देवोमोय अशीश, सभामें पत्तल छुटाऊं ॥ २ ॥ दोहा–पतल छुटाऊं प्रेमसे, सुनियो सब नर नार । हित चित दे सुन लीजियो, एहि विवाहकी भार ॥३॥ श्रीमनमें आनन्द कर, गुरुकूं शीश नवाय । लक्ष्मी वरकूं सुमर कर, गनपत देव मनाय ॥४॥ सहर फतेपुर गौड द्विज, पत्तल कही बनाय । हरितवालगोविन्दने, सुनियो चित्त लगाय ॥ ५ ॥ अठरासै अठयानवे, संवत मास वैसाख । शुक्लपक्ष तिथि तीज नै, अति उपज्यो अभिलाष ॥ ६ ॥ गजल ॥ सुमरूं प्रथम शारदा माय ॥ पत्तल कहूँ एक बुणाय ॥ ध्याऊं गिरीश

औ गौरी ॥ चिरंजीव हो या जो जोरी ॥ ७ ॥
सगाई प्रथम जो कीनी॥वरकूं कन्या शुभ दीनी
गावैं गीत सुन्दर नार॥लड्डू दिये सभ परवार॥८॥
पीछे पत्रिका दीनी ॥ तयारी ब्याहकी कीनी ॥
वरकूं बान बैठायो ॥ कंकण हांथ बँधवायो ॥९॥
घोडे सर्वसिणगारे ॥ जनेती सर्वहुसियारे॥चढति
जवानी है जिनके॥मनमें हर्ष अती तिनके॥१०॥
वरके सेहरो सोहै ॥ रंगीली नारकूं मोहैं ॥
ब्याहमि आये पडजानी ॥ देखत जानकी कानी
॥११॥जनेती सर्व चढ़ आये॥डेरा जानकूं द्याये॥
रंगीली जान ठहराये॥मांढेती घरां सब आये॥१२॥
मंडप ताणियो ऐसो ॥ देखैं देवता जैसो ॥ मोति-
यन चौक पुरवायो॥सोहन कलश धरवायो॥१३॥
चौकी बैठिया दोऊ ॥ देखै नार सभ कोऊ ॥
जोड्यो हस्त शुभकारी ॥ फेरा लिया बर नारी
॥१४॥ ऐसे ब्याह विधि कीन्यो ॥ थापो पूजबी
कीन्यो ॥ सुनियो इबै जीमण वार ॥ ताकी कही

जात न भार ॥१५॥ चौक ल्याय कर घाली ॥
सखियां गावतीं गाली ॥ चलावैं नैनहूके बान ॥
पुरसे सर्वही पकवान ॥ १६ ॥ जीमण बैठिया
जानी ॥ सखियांदेखती कानी॥पत्तल बांधने लागी
गावै स्नेहस्यूं रागी ॥१७॥ जिनके नैन हैं कारे॥
सोहने सीकसे सारे ॥ निजारे नैनसे करती ॥
बोलैं बचन मन हरती ॥ १८ ॥ जानू अम्बकी
डोली ॥कोयल बागमें बोली ॥ जिनके गींदोडेसे
गाल ॥ मत्त गयन्द जैसी चाल ॥ १९ ॥ दाडिम
खूब है दोऊ ॥ रीझै देख सब कोऊ ॥ जानूं पके
निंबू दोऊ ॥ जिनकूं पकड रहियें सोऊ ॥ २० ॥
जिनको पेट है ऐसो ॥ रेशम वस्त्र है जैसो॥२१॥
जांघा खूब है इनकी ॥ सनमुख देखिये तिनकी
पगमें पायली झिणकार ॥ ठिमक जगावती हैं
यार ॥ २२ ॥ लैंघा बण्याज रसकदार ॥ ऊपर
चूनडीकी फार॥आँगिया रची हैकरतार ॥ ताकी
कही जात न भार ॥२३॥ बाहां सजे बाजूबन्द ॥

चुडलो बण्यो हस्तीदंत ॥ जे पर हैं जडाऊटी ॥ सजरहि छाप छल्ला बीच ॥२४॥ गुलाबी केतकी करना ॥ भँवरा भटकता फिरना ॥ दांता चूँप चूनी जडी ॥ जाणू मोहनकूं खडी ॥ २५ ॥ ऐसे आय सभ नारी ॥ पत्तल बंधकर डारी ॥ जो कोई चतुर होवेगा ॥ पत्तल छुटाय जीमेगा ॥२६॥ पत्तल चतुर छुडावै॥रुपयो मौजकोपावे ॥ छुटाऊँ भात तरकारी ॥ कामण बांध द्यूं सारी ॥ २७ ॥ चौपाई–सुनियो इब पत्तलकी त्यारी ॥ नख सिख सूधी बांधूं नारी ॥ सब जान्याकी आज्ञा पाऊँ॥व्यञ्जन अरु पकवान छुटाऊँ ॥२८॥ छुटी जलेबी रससूं भरी ॥ बंध्या केश शीश परसरी ॥ छुट्या खाजा पूरी फीकी ॥ बंधी माथ सहती टीकी ॥२९॥ छुटचा लाडू मोतीचूर॥बंध्या नयनकज्जल भरपूर॥छुटचा पेडा छूटचो पाट ॥ बंध्यानकबेसर और नाक ॥ ३० ॥ छूटचो नुक्ती दाणा लेत ॥ बंध्या कुंडल कानसमेत ॥ छुटचा भुजिया और

सुहाल ॥ बन्ध्या तुमारा गोरा गाल ॥ ३१ ॥ छुट्या पेडा शक्कर पारा ॥ बंध्या बतीसूं दन्त तुमारा। छूटीबरफी मोदक सारे ॥ बंध्या बाजूबंद तुम्हारे ॥ ३२ ॥ बंध्यो चूडलो कङ्कण हाथ ॥ बन्धी अँगुली छल्ला साथ ॥ छूटी घर वस खूब मसाला ॥ बंध्या हार अरु मोहन माला ॥३३॥ छूटया निम्बसुणाज्यो वतियां ॥ बन्धी काचली दोऊ छतियां ॥ छूटया पापड बडा सुनीर ॥ बंधी तुमारी नाभि गंभीर ॥ ३४ ॥ छुटया दही रायता सारा ॥ बन्ध्या घंघरा देख तुमारा ॥बंधी जांघकी देख निशानी ॥ देखत मोह्या सबही जानी ॥ ३५ ॥ छूटे करै करेली सारे ॥ बांधी पग पाजेब तुम्हारे॥छुटया कन्द सर्वहिअछिया॥ बन्ध्या अणवट त्रिटकी बिछिया ॥ ३६ ॥ छुट्यो सीरो घीको धायो ॥ बन्ध्यो चीर कसूंभ रंगायो ॥ छुट्या भात सहित ही बडी ॥ बांधी मांग मोतियां जडी ॥ ३७ ॥ छूटी माता

भैनहूँ कुमारी ॥ बंधी सर्व कुटुम्बकी थारी ॥ बन्ध्या तुमारा बावल भाई। फेर बोलो तो बान्धू भाई ॥ ३८ ॥ छुटया देख जनेती सारा ॥ बंध्या साबिकयार तुमारा ॥ छुटी अंगुली नार हमारी ॥ बंधी तिरिया सेज तुमारी ॥ ३९ ॥ अब छुट्यो साबिक पकवान ॥ हरख होयकर जीमो जान ॥ सुनो सखा एक बात हमारी ॥ जानी आया पोल तुमारी ॥ ४० ॥ इनके मनकी तपन मिटावो ॥ एक एक सबकूं परणावो ॥ ब्रह्म वंश ज्यूं बधे हमारो ॥ घर घर जस ज्यूँ होय तुमारो ॥ ४१ ॥ ऐसी मैं पत्तल छुटवाई ॥ सखी मात्र सब बंद कराई ॥ पत्तलको के बांधिये नार ॥ जिसेजिमै सगत्तल संसार॥४२॥पत्तल मङ्गल नाम कुहावै ॥ चतुर होयसो सुणै सुणावै ॥ सुणकर रीझैं सबही गोरी॥चिरंजीव हो वर कन्या जोरी ॥४३॥

इति जयगोविन्दकृत मांगलिक पत्तल समाप्त।

पुस्तकें मिलने के स्थान

१) खेमराज श्रीकृष्णदास,
श्रीवेंकटेश्वर स्टीम् प्रेस,
खेमराज श्रीकृष्णदास मार्ग,
खेतवाडी, बम्बई - ४००००४

२) खेमराज श्रीकृष्णदास,
६६, हडपसर इण्डस्ट्रिअल इस्टेट
पुणे - ४११०१३

३) गंगाविष्णू श्रीकृष्णदास
लक्ष्मीवेंकटेश्वर स्टीम प्रेस,
व बुक डिपो,
अहिल्याबाई चौक, कल्याण
(जि.ठाणे- महाराष्ट्र)

४) खेमराज श्रीकृष्णदास,
चौक - वाराणसी (उ.प्र.)

Printers & Publishers
Khemraj Shrikrishnadass
Prop: Shri Venkateshwar Press
Khemraj Shrikrishnadass Marg,
7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.khe-shri.com
E-mail : khemraj@vsnl.com

Printed by Sanjay Bajaj for M/s Khemraj Shrikrishnadass
Prop. Shri Venkateshwar Press, Mumbai-400004,
at their Shri Venkateshwar Press, 66 Hadapsar Industrial Estate,
Pune -411 013.

मुद्रक एवं प्रकाशकः
खेमराज श्रीकृष्णदास,
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
खेमराज श्रीकृष्णदास मार्ग, बम्बई-४०० ००४

KHEMRAJ SHRIKRISHNADASS